**Diamond Harbour Women`s University**

**M.A. 4th Semester Examination 2022**

**Subject: Sanskrit**

**Paper: SAN/Th/4S/EC/ 401A**

**Indian Poetics**

**Full Marks: -40** **Time:2 Hours**

Answers to the questions should be written in the candidates own words as far as practicable.

**क-विभागः**

1. अधोलिखितेषु एकस्य प्रश्नस्य उत्तरं समाधेयम् । 10x1=10

क) ध्वनिलक्षणस्य महिमभट्टानुसारेण खण्डनं क्रियताम्।

ख) अनुकार्यस्य शब्दस्यार्थस्य वा कथं नोपसर्जनीकृतात्मत्वं सम्भवति इति सोदाहरणं महिमभट्टदिशा प्रतिपाद्यताम्।

2. अधस्स्थितेषु संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् । 5x2=10

क) 'सुवर्णपुष्पां पृथ्वीं चिन्वन्ति पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।' अत्र कथं न व्यञ्कतेति महिमभट्टदिशा समालोच्यताम्।

ख) निमित्तानां जातिगुणक्रियाद्रव्याणां भेदात् नामपदानां बहुविधत्वं विवेच्यताम्।?

ग) 'सर्व एव शाब्दो व्यवहारः साध्यसाधनभावगर्भतया प्रायेणानुमानरूपोऽभ्युपगन्तव्यः' इति वाक्यं सम्यग् व्याख्यायताम्।

**ख-विभागः**

3. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10x1=10

क) राजशेखरदिशा प्रतिभायाः लक्षणं सोदाहरणं सभेदं प्रतिपादयत ।

ख) नवानां पाकानां कति विभागाः? तेषु उपादेयत्वानुपादेयत्वयोर्व्यवस्थां यथाग्रन्थं वर्णयत।

4. अधोलिखितेषु प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च समाधेयम्। 5x2=10

क) यायावररीत्या निम्नाङ्कितशब्दानां लक्षणानि लिख्यन्ताम्-
वृत्तिः, पद्धतिः, वार्त्तिकम्, भाष्यम्, टीका।

ख) राजशेखरदिशा शिष्याः कतिविधाः? किञ्च तेषां स्वरूपम्?

ग) काव्यकवेः भेदाः यथाग्रन्थं सोदाहरणं लिख्यताम्।

**Diamond Harbour Women`s University**

**M.A. 4th Semester Examination 2022**

**Subject: Sanskrit**

**Paper: San/Th/4S/EC/402 C**

**Mīmāṃsā and Vyākaraṇa Philosophy**

**Full Marks: -40** **Time:2 Hours**

Answers to the questions should be written in the candidates own words as far as practicable.

**क-विभागः**

1. अधोलिखितेषु प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च समाधेयम्। 5x2=10

क) धर्मलक्षणम्।

ख) उत्पत्तिविधिः।

ग) तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्।

2. अधोलिखितयोः एकः प्रश्नः समाधेयः। 10x1=10

क) भावनाविचारः।

ख) वेदलक्षणं प्रतिपादयित्वा विधिभागं वर्णयत।

**ख-विभागः**

3. अधोलिखितेषु प्रतीकसूचितकारिकाद्वयं सुरगिरा देवनागरीलिप्या च व्याख्येयम्। 5x2=10

क) इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः॥

ख) नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।
सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः॥

ग) अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

4. अधस्स्थितेषु यथेच्छमेकं यथाग्रन्थं व्याख्येयम् । 10x1=10

क) व्याकरणेन शब्दब्रह्मणः अधिगमः।

ख) शब्दब्रह्मणः स्वरूपम्।

**DHWU**
**M.A. 4th SEMESTER EXAMINATION 2022**

**Subject- Sanskrit**

Paper- SAN/TH/4S/EC/403A

Prose Literature

Time: 2 Hours | Full Marks: 40

Answers to the questions should be written in the candidates own words as far as practicable.

**क- विभागः**

A) **एकस्य उत्तरं ग्रन्थदिशा प्रदेयम्।** **10x1=10**

क) हर्षचरितं कथा आख्यायिका वेति आलोच्यताम्।

ख) हर्षचरितस्य पञ्चमोच्छवासाद् प्राकृतिकदुर्लक्षणानि प्रदेयानि।

B) **यथेच्छं सूक्तिद्वयं सुरगिरा देवनागरीलिप्या च व्याख्यात।** **5x2=10**

क) पातयति महापुरुषान् सममेव बहूननादरेणैव
परिवर्तमान एकः कालःशैलानिवानन्तः॥

ख) लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः
यदाकृष्टास्तिर्यञ्चोपि एवमाचरन्ति।

ग) अकाण्डे खल्वयं समुपस्थितो महाप्रलयो व्यभ्र इव वज्रपातः।

सामान्योऽपि तावच्छोकः, सोच्छवासं भरणम्, अनुपदिष्टौ महाव्याधिः, अभस्मीकरणोऽग्निप्रवेशः अनुपरतस्यैव नरकवासः, निर्ज्योतिरङ्गारवर्षमशकलीकरणं क्रकचदारणमव्रणो वज्रसूचीपातः।

**ख- विभागः**

C) **एकस्य उत्तरं ग्रन्थदिशा प्रदेयम्।** **10x1=10**

क) महाश्वेतायाः सौन्दर्यं विशद्यताम्।

ख) बाणभट्टस्य रचनाशैली आलोच्यताम्।

D) **यथेच्छं प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च उत्तरत।** **5x2=10**

क) कादम्बरी कथा आख्यायिका वेति विचार्यताम्।

ख) बाणभट्टस्य वंशपरिचयः प्रदीयताम्।

ग) कादम्बरीति नामकरणस्य यथार्थता आलोच्यताम्।

**Diamond Harbour Women`s University**

**M.A.3rd Semester Examination 2022**

**Subject: Sanskrit**

**Paper: San/Th/3S/ CC/302**

**Texts on Poetics**

**F.M.-40**

**Time:2 Hours**

Answers to the questions should be written in the candidates own words as far as practicable.

## विभाग-क

1.अधोलिखितेषु एकः प्रश्नः समाधेयः। 10x1=10

क) आचार्यमम्मटदिशा काव्यप्रयोजनं प्रतिपाद्य काव्यशास्त्रीयाचार्यानुसारेण तस्य समालोचना क्रियताम्।

ख) लक्षणायाः लक्षणं सारोपासाध्यवसानाभेदौ च सोपपत्तिं सोदाहरणं च व्याख्याय तस्याः षड्विधत्वं प्रदर्शनीयम्।

2.अधोलिखितेषु कारिकांशद्वयं संस्कृतभाषया देवनागरीलिप्या च व्याख्यायताम्। 5x2=10

क) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।

ख)... इति हेतुस्तदुद्भवे।

ग) न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः॥

## विभाग-ख

3.अधोलिखितेषु एकः प्रश्नः समाधेयः। 10x1=10

क) प्रतीयमानार्थस्य वाच्यादन्यत्वं सोदाहरणं यथाग्रन्थं व्याख्यायताम्।

ख) काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः इति कारिकांशः यथाग्रन्थं व्याख्यायताम्।

4. अधोनिर्दिष्टेषु यथेच्छं प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च समाधेयम्। 5x2=10

क) ध्वन्यालोकस्य मङ्गलश्लोकः व्याख्यायताम्।

Assistant Professor
Co-ordinator
Dept. of Sanskrit
Diamond Harbour Women's University

ख) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ इति कारिका यथाग्रन्थं आलोच्यताम्।

ग) 'तदभाववादीनां चामी विकल्पाः सम्भवन्ति' इति सप्रसङ्गं यथाग्रन्थं वर्ण्यताम्।

कृपया उत्तरपुस्तिकां rachna.rastogi@gmail.com इति ईमेले प्रेषयतु ।

Rachna Rastogi

Assistant Professor
Co-ordinator
Dept. of Sanskrit
Diamond Harbour Women's University

**Diamond Harbour Women`s University**

**M.A.3rd Semester Examination 2022**

**Subject: Sanskrit**

**Paper: San/Th/3S/EC/ 304 A**

**Dramaturgy**

**F.M.-40** **Time:2 Hours**

Answers to the questions should be written in the candidates own words as far as practicable.

## विभागः - कः (नाट्यशास्त्रे प्रश्नाः)

1. अधोलिखितेषु एकप्रश्नः समाधेयः। 10 x1 =10

क) नाट्यशास्त्रानुसारेण भरतस्य रसनिष्पत्तिसूत्रं तद्विवरणभाष्यञ्च निरूप्यताम्।

ख) प्रेक्षागृहनिर्माणे कतिविधः सन्निवेशो भवति इति पर्यालोच्यताम्?

2. अधोनिर्दिष्टेषु प्रश्नद्वयं संस्कृतभाषया देवनागरीलिप्या च व्याख्यायताम्। 5x2=10

क) नाट्यशास्त्रानुसारेण रसानां संख्या प्रदर्श्य रसभावयोः परस्परसम्बन्धः प्रतिपादनीयः।

ख) नाट्यगृहनिर्माणे सूत्रप्रसारणविधिः सोदाहरणं विवेचनीया।

ग) नाट्यशास्त्रे वर्णितानां स्तम्भानां स्थापनविधिर्विलिख्याम्।

## विभागः - खः (दशरूपके प्रश्नाः)

3.अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उत्तरं लिख्यताम्। 10x1=10

क) नृत्यनृत्तयोर्भेदं दशरूपकदिशा सयुक्तिकं विवेचयत।

ख) पञ्चावस्थाः सयुक्तिकं प्रतिपादनीयाः।

4. अधोनिर्दिष्टेषु संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयस्य उत्तरं प्रदेयम्। 5x2=10

क) मुखसन्धिः।

ख) पताकास्थानम्।

ग) भारतीवृत्तिः।

**Diamond Harbour Women`s University**
**M.A. 4th Semester Examination 2022**
**Subject- Sanskrit**

**Paper- San/Th/4S/EC/403C**

**Nyāya and Vaiśeṣik Philosophy**

Time: 2 Hours | Full Marks: 40

Answers to the questions should be written in the candidates own words as far as practicable.

क-विभागः

1. अधोलिखितयोः **एकस्य** उत्तरं प्रदेयम् । 10 x 1 = 10

(1) प्रत्यक्षलक्षणसूत्रं न्यायभाष्यदिशा व्याख्यायताम् ।

(2) अनुमानलक्षणसूत्रं न्यायभाष्यदिशा व्याख्यायताम् ।

2. अधोलिखितेषु **द्वयोः** उत्तरं ग्रन्थदिशा सुरगिरा देवनागरीलिप्या च प्रदेयम् । 5 x 2 = 10

(1) 'प्रदीपः सर्वविद्यानाम्.........' इति श्लोकमुल्लिख्य भाष्यदिशा व्याख्या करणीया ।

(2) गौतमोक्तं द्वितीयसूत्रमुल्लिख्य अपवर्गप्राप्तेः क्रमः निरूपणीयः ।

(3) 'चतसृषु चैवं विधास्वर्थतत्त्वं परिसमाप्यते' – अस्य वाक्यस्य तात्पर्यम् आलोच्यताम् ।

ख-विभागः

3. अधोलिखितयोः **एकस्य** उत्तरं प्रदेयम् । 10 x 1 = 10

(1) पृथिव्याः लक्षणं प्रतिपादयित्वा तस्याः भेदान् यथाग्रन्थं वर्णयत ।

(2) चतुर्णां महाभूतानां सृष्टिसंहारक्रमं यथाग्रन्थं वर्णयत।

4. अधोलिखितेषु प्रश्न**द्वयं** ग्रन्थदिशा सुरगिरा देवनागरीलिप्या च समाधेयम् । 5 x 2 = 10

(1) पदार्थधर्मसंग्रहग्रन्थस्य मङ्गलाचरणश्लोकमुल्लिख्य व्याख्यायताम् ।

(2) 'च-शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दाः सप्तैवेत्येवं चतुर्विंशतिर्गुणाः' – इति वाक्यस्य तात्पर्यं लिख्यताम् ।

(3) तेजसः स्वरूपं यथाग्रन्थं वर्णयत।

**Diamond Harbour Women`s University**

**M.A. 4th Semester Examination 2022**

**Subject: Sanskrit**

**Paper: SAN/Th/4S/EC/404A**

**Literary Criticism**

**Full Marks: - 40** **Time:2 Hours**

Answers to the questions should be written in the candidates own words as far as practicable.

**क-विभागः**

1. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्य उत्तरं लिख्यताम् । 10x1=10
   क) श्रीजगन्नाथकृतं काव्यलक्षणं सपदकृत्यं स्फुटीक्रियताम्।
   ख) 'शयिता सविधेऽप्यनीश्वरा' इत्यादि पद्यं व्याख्याय रतेः प्राधान्यं त्रपादावेत्यत्र ग्रन्थकृन्मतं समालोचयन्तु।

2. अधस्स्थितेषु प्रश्नद्वयं संस्कृतभाषया देवनागरी लिप्या च समाधेयम्। 5x2=10
   क) पण्डितराजोक्तदिशा प्रतिभायाः लक्षणं सपदकृत्यं व्याख्यायताम्।
   ख) काव्यत्वं शब्दार्थयुगले पर्याप्तं शब्दविशेषे वा नियतमिति विचार्यताम्।
   ग) अभिनवगुप्तोक्तं रसस्वरूपं जगन्नाथदिशा प्रतिपादनीयम्।

**ख-विभागः**

3. अधोलिखितेषु एकः प्रश्नः समाधेयः। 10x1=10
   क) आचार्यकुन्तकाभिमतं काव्यप्रयोजनमभिधाय 'काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते' इति तत्प्रतिज्ञायां सत्यां वक्रोक्तिजीवितमिति तद् ग्रन्थस्याभिधाने का वाचो युक्तिरिति विमृशत।
   ख) कुन्तकाभिमतं काव्यमार्गत्रयं तत्तद् गुणविवेचनपुरस्सरं विमृश्यताम्।

4. अधोनिर्दिष्टेषु संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् । 5x2=10
   क) कुन्तकानुसारेण स्वभावोक्तेरलङ्कारत्वं निराक्रियताम्।
   ख) आचार्यकुन्तकदिशा शब्दार्थस्वरूपं सोदाहरणं प्रस्तूयताम्।
   ग) आचार्यकुन्तकाभिमतं पदपूर्वार्धवक्रता का? तस्याः भेदाः सोदाहरणं संक्षेपेण विवेच्यताम्।

**DHWU**

**M.A. 4th SEMESTER EXAMINATION 2022**

**Subject- Sanskrit**

Paper- SAN/TH/4S/EC/404C

Atheist Philosophy

Time : 2 Hours | Full Marks : 40

Answers to the questions should be written in the candidates own words as far as practicable.

**क- विभागः**

A) **एकस्य उत्तरं ग्रन्थदिशा प्रदेयम्।** **10x1=10**

क) बौद्धदर्शनानुसारं भावनाचतुष्टयम् आलोच्यताम्।

ख) चत्वारि आर्यसत्यानि प्रतिपाद्यन्ताम्।

B) **यथेच्छं प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च उत्तरत।** **5x2=10**

क) अन्वयव्यतिरेकाभ्यां किमर्थं व्याप्तिज्ञानम् असम्भवम् ?

ख) बौद्धदर्शनानुसारं दुःखसमुदायाः व्याख्यायन्ताम्।

ग) क्षणिकत्वभावना अनुमानेन साध्यताम्।

**ख- विभागः**

C) **एकस्य उत्तरं ग्रन्थदिशा प्रदेयम्।** **10x1=10**

क) जैनदर्शनानुसारं स्याद्वादः विशद्यताम्।

ख) जैनदर्शनदिशा कर्माणि आलोच्यन्ताम्।

D) **यथेच्छं प्रश्नद्वयं सुरगिरा देवनागरीलिप्या च उत्तरत।** **5x2=10**

क) पञ्चमहाव्रतम्।

ख) बन्धः।

ग) सम्यग्ज्ञानम्।

ॐॐॐ